श्रीमते रामानुजाय नमः

# ॥ श्री वेङ्कटेश सुप्रभातम् ॥

* कौसल्या सुप्रजा राम पूर्वा सन्ध्या प्रवर्तते।
उत्तिष्ठ नरशार्दूल कर्तव्यं दैवमाह्निकम् ॥ १

* उत्तिष्ठोत्तिष्ठ गोविन्द उत्तिष्ठ गरुडध्वज।
उत्तिष्ठ कमलाकान्त त्रैलोक्यं मङ्गलं कुरु ॥ २

मातस्समस्तजगतां मधुकैटभारेः
वक्षोविहारिणि मनोहर दिव्यमूर्ते।
श्रीस्वामिनि श्रितजन प्रियदान शीले
श्रीवेङ्कटेश दयिते तव सुप्रभातम् ॥ ३

तव सुप्रभातं अरविन्दलोचने
भवतु प्रसन्नमुख चन्द्रमण्डले।
विधिशङ्करेन्द्र वनिताभिरर्चिते
वृषशैलनाथदयिते दयानिधे ॥ ४

अत्रयादि सप्तरिषयस्समुपास्य सन्ध्यां
आकाशसिन्धु कमलानि मनोहराणि।
आदाय पादयुगमर्चयितुं प्रपन्नाः
शेषाद्रि शेखर विभो तव सुप्रभातम् ॥ ५

पञ्चाननाब्जभव षण्मुख वासवाद्याः
त्रैविक्रमादिचरितं विबुधाः स्तुवन्ति।

भाषापतिः पठति वासर शुद्धिमारात्
शेषाद्रि शेखर विभो तव सुप्रभातम्॥ ६

ईषत् प्रफुल्ल सरसीरुह नारिकेल
पूगद्रुमादि सुमनोहर पालिकानाम्॥
आवाति मन्दमनिलस्सह दिव्यगन्धैः
शेषाद्रि शेखर विभो तव सुप्रभातम्॥ ७

उन्मील्य नेत्रयुगमुत्तम पञ्जरस्थाः
पात्रावशिष्ट कदलीफल पायसानि।
भुक्त्वा सलीलमथ केलिशुखाः पठन्ति
शेषाद्रि शेखर विभो तव सुप्रभातम्॥ ८

तन्त्री प्रकर्ष मधुरस्वनया विपञ्च्या
गायत्यनन्तचरितं तव नारदोऽपि।
भाषासमग्रमसकृत् करचार रंयं
शेषाद्रि शेखर विभो तव सुप्रभातम्॥ ९

भृङ्गावली च मकरन्द रसानुविद्ध
जङ्कारगीत निनदैस्सह सेवनाय।
निर्यात्युपान्त सरसी कमलोदरेभ्यः
शेषाद्रि शेखर विभो तव सुप्रभातम्॥ १०

योषागणेन वरदध्नि विमथ्यमाने
घोषालयेषु दधिमन्थन तीव्रघोषाः।
रोषात्कलिं विदधते ककुभश्च कुम्भाः

शेषाद्रि शेखर विभो तव सुप्रभातम्॥ ११

पद्मेश मित्र शतपत्र गतालिवर्गाः
हर्तुं श्रियं कुवलयस्य निजाङ्गलक्ष्म्या।
भेरी निनादमिव बिभ्रति तीव्रनादम्
शेषाद्रि शेखर विभो तव सुप्रभातम्॥ १२

श्रीमन् नभीष्ट वरदाखिल लोक बन्धो
श्रीश्रीनिवास जगदेक दयैक सिन्धो।
श्रीदेवता गृह भुजान्तर दिव्यमूर्ते
श्रीवेङ्कटाचलपते तव सुप्रभातम्॥ १३

श्रीस्वामि पुष्करिणिकाऽऽप्लव निर्मलाङ्गाः
श्रेयोऽर्थिनो हरविरिञ्चिसनन्दनाद्याः॥
द्वारे वसन्ति वरवेत्र हतोत्तमाङ्गाः
श्रीवेङ्कटाचलपते तव सुप्रभातम्॥ १४

श्रीशेषशैल गरुडाचल वेङ्कटाद्रि
नारायणाद्रि वृषभाद्रि वृषाद्रि मुख्याम्।
आख्यां त्वदीय वसतेरनिशं वदन्ति
श्रीवेङ्कटाचलपते तव सुप्रभातम्॥ १५

सेवापराः शिव सुरेश कृशानु धर्म
रक्षोऽम्बुनाथ पवमान धनाधिनाथाः।
बद्धाञ्जलि प्रविलसन् निज शीर्ष देशाः
श्रीवेङ्कटाचलपते तव सुप्रभातम्॥ १६

धाटीषु ते विहगराज मृगाधिराज
नागाधिराज गजराज हयाधिराजः।
स्वस्वाधिकार महिमाधिक मर्थ्यन्ते
श्रीवेङ्कटाचलपते तव सुप्रभातम्॥ १७

सूर्येन्दु भौम बुधवाक्पति काव्य सौरि
स्वर्भानु केतु द्विषत्परिषत्प्रधानाः।
त्वद्दास दास चरमावधि दास दासाः
श्रीवेङ्कटाचलपते तव सुप्रभातम्॥ १८

त्वत्पाद धूलि भरित स्फुरितोत्तमाङ्गाः
स्वर्गापवर्ग निरपेक्ष निजान्तरङ्गाः।
कल्पागमाकलनयाऽऽकुलतां लभन्ते
श्रीवेङ्कटाचलपते तव सुप्रभातम्॥ १९

त्वद्गोपुराग्रशिखराणि निरीक्षमाणाः
स्वर्गापवर्ग पदवीं परमां श्रयन्तः।
मर्त्या मनुष्यभुवने मतिमाश्रयन्ते
श्रीवेङ्कटाचलपते तव सुप्रभातम्॥ २०

श्रीभूमिनायक दयादिगुणामृताब्धे
देवादिदेव जगदेक शरण्यमूर्ते।
श्रीमन् अनन्त गरुडादिभिरर्चिताङ्घ्रे
श्रीवेङ्कटाचलपते तव सुप्रभातम्॥ २१

श्रीपद्मनाभ पुरुषोत्तम वासुदेव

वैकुण्ठ माधव जनार्दन चक्रपाणे।
श्रीवत्सचिह्न शरणागत पारिजात
श्रीवेङ्कटाचलपते तव सुप्रभातम्॥ २२

कन्दर्प दर्पहर सुन्दर दिव्य मूर्ते
कान्ता कुचाम्बुरुह कुड्मल लोल दृष्टे।
कल्याण निर्मल गुणाकर दिव्य कीर्ते
श्रीवेङ्कटाचलपते तव सुप्रभातम्॥ २३

मीनाकृते कमठ कोल नृसिम्ह वर्णिन्
स्वामिन् परश्वथ तपोधन रामचन्द्र।
शेषांशराम यदुनन्दन कल्किरूप
श्रीवेङ्कटाचलपते तव सुप्रभातम्॥ २४

एला लवङ्ग घनसार सुगन्ध तीर्थं
दिव्यं वियत्सरिति हेम घटेषु पूर्णम्।
धृत्वाऽद्य वैदिक शिखामणयः प्रहृष्टाः
श्रीवेङ्कटाचलपते तव सुप्रभातम्॥ २५

भास्वानुदेति विकचानि सरोरुहाणि
संपूरयन्ति निनदैः ककुभो विहङ्गाः।
श्रीवैष्णवाः सततमर्थित मङ्गळास्ते
धामाश्रयन्ति तव वेङ्कट सुप्रभातम्॥ २६

ब्रह्मादयः सुरवराः समहर्षयस्ते
सन्तः सनन्दन मुखास्तव योगिवर्याः।

धामान्तिके तव हि मङ्गलवस्तुहस्ताः

श्रीवेङ्कटाचलपते तव सुप्रभातम्॥ २७

लक्ष्मीनिवास निरवद्य गुनैक सिन्धो

संसार सागर समुत्तरणैकसेतो।

वेदान्तवेद्य निजवैभव भक्त भोग्य

श्रीवेङ्कटाचलपते तव सुप्रभातम्॥ २८

* इत्थं वृषाचलपतेरिह सुप्रभातं

ये मानवाः प्रतिदिनं पठितुं प्रवृत्ताः।

तेषां प्रभात समये स्मृतिरङ्गभाजाम्

प्रज्ञां परार्थ सुलभां परमां प्रसूते॥ २९

**॥ इति वेङ्कटेश सुप्रभातं संपूर्णम्॥**